## एजेः खश्। (२८/२९४१)

'एजृ कम्पने' (धा.पा. २३४) इत्यस्मात् ण्यन्तात् कर्मण्युपपदे खश् प्रत्ययो भवति। खकारो मुमर्थः। शकारः [1]सार्वधातुकसञ्ज्ञार्थः। अङ्गमेजयति[2] अङ्गमेजयः। जनमेजयः।

[२४४] खश्[3]प्रत्यये वातशुनीतिलशर्धेष्वजधेट्तुद[4]जहातीनामुपसङ्ख्यानम्। (म.भा. २.१०२)

वातमजा मृगाः। शुनिन्धयः। तिलन्तुदः। शर्धञ्जहा[5] [6]माषाः॥

## नासिकास्तनयोर्ध्माधेटोः। (२९/२९४४)

नासिकास्तनयोः कर्मणोरुपपदयोः ध्माधेटोर्धात्वोः खश् प्रत्ययो भवति। यथासङ्ख्यमत्र नेष्यते।

[२४५] स्तने धेटः। (म.भा. २.१०२)

[7]स्तनन्धयः।

[२४६] नासिकायां तु ध्मश्च धेटश्च। (म.भा. २.१०२)

नासिकन्धमः, नासिकन्धयः।

तच्चैतन्नासिकस्तनयोरिति लक्षणव्यभिचारचिह्नादल्पाच्तरस्यापूर्वनिपातनाल्लभ्यते। धेटः टित्वात् स्त्रियां [8]ङीप् प्रत्ययो भवति। स्तनन्धयी[9]॥

## नाडीमुष्ट्योश्च। (३०/२९४५)

नाडी मुष्टि इत्येतयोः कर्मणोरुपपदयोः ध्माधेटोः[10] खश्प्रत्ययो भवति। अत्रापि [11]घ्यन्तस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नम्। तेन सङ्ख्यातानुदेशो न भवति। नाडिन्धमः। मुष्टिन्धमः। नाडिन्धयः। मुष्टिन्धयः। अनुक्तसमुच्चयार्थश्चकारः। घटिन्धमः। घटिन्धयः। खारिन्धमः। खारिन्धयः (म. भा. २. १०२)। वातन्धमः [12]पर्वतः। वातन्धयः॥

## उदि कूले रुजिवहोः। (३१/२९४६)

'रुजो भङ्गे' (धा.पा. १४१७), 'वह प्रापणे' (धा.पा. १००५) इत्येताभ्यामुत्पूर्वाभ्यां[13] कूले कर्मणि उपपदे खश् प्रत्ययो भवति। कूलम् उद्रुजति इति कूलमुद्रुजो [14]रथः। [15]कूलमुद्वहः॥

## वहाभ्रे लिहः। (३२/२९४७)

वह अभ्र इत्येतयोः कर्मणोरुपपदयोः लिहेर्धातोः खश् प्रत्ययो भवति। [16]वहं लेढि इति वहंलिहो गौः। अभ्रंलिहो वायुः॥

---

1. सार्वधातुकार्थः फ. 2. इति इत्यधिकम् फ. 3. °प्रकरणे ब.क.ड.फ.न्या. 4. °जहातिभ्यः क. 5. गन्धहरा, गन्धवहाः इत्यधिकम् फ. 6. मृगाः अ.क.फ. 7. स्तनंधयाः ब. 8. ङीप् नास्ति क. 9. इति इत्यधिकम् फ. 10. धात्वोः इत्यधिकम् क.फ. 11. घ्यन्तस्य अपूर्वनिपातनात् चिह्नात् अ.क.फ. 12. पर्वतः नास्ति ब. 13. धातुभ्याम् इत्यधिकम् फ. 14. गजः अ.क., नास्ति ग.फ. 15. कूलमुद्वहति इति कूलमुद्वहा नदी फ. 16. वहं स्कन्धः इत्यधिकम् ड.